लब्धविद्यार्ज्जितधने तु सर्व्वेषां मूर्खामूर्खाणामंशित्वम् । विद्याधनं यथा, यदि भवान् भद्रमुपन्यस्यति तदा भवते एतावद्धनं दातव्यं इति पणितं तत्र भद्रोपन्यासेन यत् पणितं धनं लब्धं तत् । अध्यापितशिष्याद्यल्लब्धम् । ऋत्विक्कर्म्मकरणेन यजमानाद्दक्षिणादिरूपं लब्धं धनम् । यत्किञ्चित् विद्यायाः प्रश्ने कृते तत्र सम्यगुत्तरेण परितोषादपणितमेव किञ्चिद्धनं ददाति तत् । यो ह्यस्मिन् शास्त्रार्थे मम संशयमपनयति तस्मै सुवर्णादिकमिदं दास्यामीत्युक्ते तस्य संशयमपनीय यल्लब्धम् । वादिनोः कुत्रचिद्वादविषयसन्देहे न्यायकरणार्थमागतयोः सम्यङ्निरूपणेन यल्लब्धम् । शास्त्रादिषु स्वज्ञानं प्रकाश्य प्रतिग्रहादिना यल्लब्धम् । तथात्वर्थवादाद्वादविचारे वा परं निर्ज्जित्य यल्लब्धम् । एकस्मिन् देये वस्तुनि बहूनां ब्राह्मणानां समुत्थाने येन प्रकृष्टं वेदमधीत्य यल्लब्धम् । चित्रकरसुवर्णकारादिभिः शिल्पिभिर्मूल्यादधिकं यल्लब्धम् । द्यूतेनापि परं निर्ज्जित्य यल्लब्धम् । एतानि अविभाज्यानि ॥ * ॥

क्रमादभ्यागतं द्रव्यमन्येन हृतं यदि दायादानामनुमत्या तेषामेकतरेण साधारणधनानुपघातेन इतरव्यापारनैरपेक्ष्येण च धनमुद्धरति तदा तद्धनमुद्धारकर्त्तुरेव । भूमिस्तु यदि अन्येर्हृता एकेनोद्धृता तदा स तुरीयांशं गृहीत्वा अवशिष्टभागत्रयं अन्यैः सह समं विभजेत् । अयं निष्कर्षः विभक्तेनाविभक्तेन वा साधारणधनानुपघातेनापरव्यापारनैरपेक्ष्येण येन यदर्ज्जितं तदर्ज्जकस्यैव न तु तद्विभाज्यमितरैः । किन्तु विद्यालब्धधनमात्रे विशेषः स च प्रागेवाभिहितः । अङ्गयोजितं वस्त्रालङ्कारं अश्वादिवाहनं लड्डुकादिकूपवाप्यादिगतं पित्रादिसम्बन्धिजलं दासीव्यतिरिक्ता स्त्री गोप्रचाररथ्या एतानि नान्यधनवद्विभाज्यानि किन्तु स्वव्यापारेण तद्ग्रहीतव्यं एवं स्वस्वव्यापारोपयुक्तशयनभोजनपात्रादि न विभजनीयं येन यद्गृहीतं तत्तस्यैव । पुस्तकन्तु मूर्खैर्न ग्राह्यं किन्तु पण्डितेन तदन्तर्गतस्वांशतुल्यद्रव्यान्तरं मूल्यमेव वा दत्त्वा ग्रहीतव्यं एवं शिल्पिनां शिल्पोपयुक्तद्रव्यं नाशिल्पिनां तत्रापि पुस्तकवद्व्यवस्था । पितरि जीवति यस्मिन् वास्तौ येन गृहोद्यानादिकं कृतं तस्य न विभागः यद्यपरेणापि वास्त्वन्तरे तथा कृतम् ॥ * ॥

अथ संसृष्टविभागक्रमार्थमादौ संसर्गो निरूप्यते ।

पितृभ्रातृपितृव्याणामन्यतरेण सह विभक्तः सन् पुनरन्योन्येच्छया पूर्व्वकृतविभागमपेक्ष्य यत्तव धनं तन्मम धनं यन्मम तत्तवापीति व्यवस्थया एकगृहिरूपतयावस्थानं संसर्गः ॥ अथ संसृष्टविभागः । अत्र भ्रातॄणां अन्येषां तुल्यसम्बन्धिनां वा संसृष्टसंसर्गिणां मध्ये संसर्गिणामेव प्रथमं मृतसंसर्गिधनेऽधिकारः । तदभावे तथाविधासंसर्गिणामिति क्रमः ॥*॥ एवं यदा पिता पुत्त्रान् विभज्य यथाशास्त्रं भागं गृहीत्वा पुत्त्रैः सहासंसृष्ट एव पुत्त्रान्तरमुत्पाद्य मृतस्तदा विभागानन्तरजात एव तद्धनाधिकारी न पूर्व्वविभक्तः एवं पूर्व्वभ्रातृविभागेऽपि विभक्तजस्य नांशित्वम् । यदि तु येन केनचित् पुत्त्रेण संसृष्टः सन् पिता मृतः तदा तद्धनं संसृष्टविभक्तजाभ्यां समं विभाज्यं यथा धने तथर्णेऽपि । यद्यविज्ञातगर्भायामेव स्त्रियां पुत्त्रा विभक्तास्तद्गर्भजातो विभक्तद्रव्याण्येकीकृत्य पुनर्विभज्य स्वांशं गृह्णीयात् न तु विभक्तजेन सह पितृद्रव्येऽंशित्वम् ॥*॥

अथ पितृकृतविभागो निरूप्यते ।

यत्र पितृकृतविभागस्तत्र स्वोपार्जितधने पितुरिच्छैव नियामिका । पितामहधने तु मातृरजोनिवृत्तिसहकृता तदिच्छा नियामिका । स्वोपार्जितधने पिता इच्छया धनं ग्रहीतुं शक्नोति कस्मैचिदधिकं कस्मैचिन्न्यूनं दातुमर्हति । पैतामहधनविभागे तु पिता स्वयमंशद्वयं गृहीत्वा पुत्त्रेभ्य एकैकांशं दद्यात् । किन्तु पैतामहमणिमुक्ताप्रवालादिषु पितुः स्वाच्छन्द्यं भूमिनिबन्धद्विपदान्यतमे न स्वाच्छन्द्यम् । स्वार्जितधनविभागे पित्रा अपुत्त्रपत्नीभ्यः पुत्त्रतुल्यांशो देयः यदि ताभ्यः स्त्रीधनं न दत्तं स्त्रीधने दत्ते सति अर्द्धं देयम् । पुत्त्रकर्त्तृकविभागे तु विमातुरंशाभावः ॥*॥ शूद्रस्य दासीपुत्त्रोऽपि पितुरिच्छया परिणीतस्त्रीजातपुत्त्रेण सह तुल्याधिकारी मृते पितरि तदंशार्द्धाधिकारी । तथाविधभ्रात्रभावे दौहित्रे चासति पितुः सर्व्वधनाधिकारी सति दौहित्रे तेन सह तुल्याधिकारी ॥ * ॥ पितरि मृते मातरि जीवन्त्यां पुत्त्राणां विभागो न धर्म्म्यः यदि जीवन्त्यां मातरि विभागं कुर्व्वन्ति तदा मातापि पुत्त्रतुल्यांशभागिनी । विमातुरंशाभावः किन्तु सा ग्रासाच्छादनादिना भर्त्तव्या । एवं पितामहधने पौत्त्रैर्विभाज्यमाने पितामह्यः पौत्त्रतुल्यांशभागिन्यः ॥ * ॥ औरसेन दत्तकादीनां विभागे औरसस्य द्व्यंशित्वं सवर्णदत्तकादेरेकैकांशित्वम् । विभागस्तु पित्रादेर्धनिनः ऋणं परिशोध्य तदवशिष्टधनस्य करणीयः । उत्तमर्णेच्छया विभज्य वा तदृणं परिशोधनीयम् । एकेन भ्रात्रादिना बहुपोष्यतया यत्राधिकं भुक्तं तत्र न विभुक्तांशो विभागमध्ये प्रवेशनीयः । किन्तु भुक्तावशिष्टस्य विद्यमानधनस्यैव विभागः कार्य्यः ॥*॥ असंस्कृतभ्रातृभगिनीनां पैतृकधनेन संस्कारः कर्त्तव्यः । विभागकाले केनचिन्निह्नुतस्य पश्चात् प्राप्तस्य समभागः कर्त्तव्यः । भ्रमादिना कृताशास्त्रीयविभागधनस्य पुनः शास्त्रीयविभागः कार्य्यः ॥*॥

अथ विदेशागतस्य विभागः ।

विभक्तत्वादशायां देशान्तरगतस्य चिरकालानन्तरागतस्य सप्तमपुरुषपर्य्यन्तं तत्सन्ततेरपि मौलसामन्तादिना वा स्वज्ञापनपूर्व्वकं क्रमागतधनात् यथाशास्त्रमंशभागित्वमिति स्थितं एषा व्यवस्था विदेशागतविषयिणी देशस्थविषये तु धनिनश्चतुर्थपर्य्यन्त एव तद्धनविभागार्हता । साधारणधनेऽपि स्वांशदानं कर्त्तव्यम् । इति श्रीकृष्णतर्कालङ्कारकृतक्रमसंग्रहः ॥ * ॥

"देशस्य जातेः संघस्य धर्म्मो ग्रामस्य यो भृगुः ।
उदितः स्यात् स तेनैव दायभागं प्रकल्पयेत् ॥"

इति दायतत्त्वम् ॥

दायविभागः, पुं, (दायस्य विभागः ।) दायभागः । यथा । "किं दायस्य विभागो विभक्तावयवत्वं किंवा दायेन सह विभागोऽसंयुक्तत्वम् ।" इति जीमूतवाहनः ॥

दायादः, पुं, (आदत्ते इति । आ+दा+"आतश्चोपसर्गे ।" ३।१।१३६ । इति कः । दायस्य आदः ग्राहकः ।) सपिण्डः । पुत्त्रः । इत्यमरः । ३।३।८८॥ (यथा, महाभारते । १ । ८५ । २ ।
"पुरुणा तु कृतं वाक्यं मानितश्च विशेषतः ।
कनीयान् मम दायादो धृता येन जरा मम ॥")

दायादी स्त्री, (दायं अत्तीति । अद्+अण् । स्त्रियां ङीष् ।) कन्या । इति शब्दार्थकल्पतरुः ॥

दायितः, त्रि, (दाय दाने+णिच्+क्तः ।) दापितः । इत्यमरटीकायां भरतः ॥

दारकः,पुं, (दारयति नाशयति जनकस्य पितॄणमिति । दॄ+णिच्+ण्वुल् ।) पुत्त्रः । इति हेमचन्द्रः ।३ ।२०६॥ (यथा, महाभारते ।१।८३।१३।
"कस्यैते दारका राजन् देवपुत्त्रोपमाः शुभाः ।
वर्च्चसा रूपतश्चैव सदृशा मे मतास्तव ॥")
बालकः । इति मेदिनी । के, १०३ ॥ (यथा, महाभारते । १ । ८३ । १६ ।
"शर्म्मिष्ठां मातरञ्चैव तथा चख्युश्च दारकाः ॥")
दारुकः । इति शब्दार्थकल्पतरुः ॥ ग्राम्यशूकरः । इति राजनिर्घण्टः ॥

दारकः, त्रि, (दारयतीति । दॄ+णिच्+ण्वुल् ।) भेदकः । इति मेदिनी । के, १०३ ॥ (यथा,—
"अशेषदुर्नामकरोगदारकं
करोति वृद्धं सहसैव दारकम् ॥"
इति वैद्यकचक्रपाणिसंग्रहेऽर्शोऽधिकारे ॥")

दारकर्म्म,क्ली, (दारार्थं पत्न्यर्थं यत् कर्म्म ।) विवाहः । इति त्रिकाण्डशेषः ॥ (यथा, देवीभागवते । १ । १४ । २६ ।
"दारकर्म्म ततो व्यासः शुकस्य पर्य्यचिन्तयत् ॥")

दारणं, क्ली, (दारयति नाशयति जलमलमनेनेति । दॄ+णिच्+करणे ल्युट् ।) कतकम् । इति शब्दचन्द्रिका ॥ (दॄ+णिच्+भावे ल्युट् ।) विदारणम् । यथा, "दारुदारणपथैः" समाहृतम् । इति लीलावती ॥ (व्रणादिस्फोटनसम्पादक औषधविशेषः । यथा, सुश्रुते । १ । ३६ ।
"चिरविल्वोऽग्निको दन्ती चित्रको हयमारकः ।
कपोतगृध्रकङ्कानां पुरीषाणि च दारणम् ॥
क्षारद्रव्याणि वा यानि क्षारो वा दारणं परम् ॥"
दारयतीति । दॄ+णिच्+कर्त्तरि ल्युः । विदारके, त्रि । यथा, महाभारते । ८ । ४६ । १७ ।
"समाधत्त शितं बाणं गिरीणामपि दारणम् ॥"